**22E**
**100 Marks**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत पारंगत (एम.ए.) बहि:स्थ**

**परीक्षा: जानेवारी – २०२३**

**सत्र १ ले**

**विषय: सौन्दरनन्द (22E316)**

| दिनांक: १३/०१/२०२३ | गुण : १०० | वेळ : स. १०.०० ते १.०० |
|---|---|---|

**सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.**

**प्र. १. षण्णां श्लोकानां स्वभाषया अनुवादं कुरुत।** **(३०)**

१. तौ देवदारूत्तमगन्धवन्तं नदीसरः प्रस्रवणौघवन्तम्। आजग्मतुः काञ्चनधातुमन्तं देवर्षिमन्तं हिमवन्तमाशु।।

२. शान्तेन्द्रिये तत्र मुनौ स्थिते तु सविस्मयं दिक्षु ददर्श नन्दः। दरीश्च कुञ्जाश्च वनौकसश्च विभूषणं रक्षणमेव चाद्रेः।।

३. इत्येवमुक्तः सुगतेन नन्दः कृत्वा स्मितं किञ्चिदिदं जगाद। क्व चोत्तमस्त्रीः भगवन् वधूस्ते मृगी नगक्लेशकरी क्व चैषा।।

४. अहो सदृशमारब्धं श्रुतस्याभिजनस्य च। निगृहीतेन्द्रियः स्वस्थो नियमे यदि संस्थितः।।

५. एकस्तु मम सन्देहस्तवास्यां नियमे धृतौ। अत्रानुनयमिच्छामि वक्तव्यं यदि मन्यसे।।

६. यथासनार्थं स्कन्धेन कश्चिद्गुर्वी शिलां वहेत्। तद्वत् त्वमपि कामार्थं नियमं वोढुमुद्यतः।।

७. प्रणम्य च गुरौ मूर्ध्नौ बाष्पव्याकुललोचनः। कृत्वाञ्जलिमुवाचेदं ह्रिया किञ्चिदवाङ्मुखः।।

८. अद्य ते सफलं जन्म लाभोऽद्य सुमहांस्तव। यस्य कामरसज्ञस्य नैष्क्रम्यायोत्सुकं मनः।।

**प्र. २. षड्वाक्यानि ससन्दर्भं स्पष्टीकुरुत।** **(३६)**

१. अन्योन्यसंश्लिष्टविकीर्णपक्षौ सरःप्रकीर्णाविव चक्रवाकौ।

२. तस्यां ततः सम्प्रति काचिदास्थां न मे निशम्यैव हि रूपमासाम्।

३. विधत्स्व तस्मादगदं महाभिषक्।

४. प्रबलः प्रबलैरेव यत्नैर्नश्यति वा न वा।

५. नृलोकं पुनरेवैति प्रवासात्स्वगृहं यथा।

६. सर्वदुःखक्षयकरे त्वद्धर्मे परमे रमे।

७. सदोषं सलिलं दृष्ट्वा पथिनेव पिपासुना।

८. अरण्यां मथ्यमानायामग्नेर्धूम इवोत्थितः।

**प्र.३.** अश्वघोषस्य कालः लेखनकार्यम् इत्येवं विषयमधिकृत्य निबन्धो लेख्यः। **(१६)**

**अथवा**

नन्दस्य स्वभाव-चित्रणं कुरुत।

**प्र. ४. टिपणीद्वयं लिखत।** **(१२)**

१. स्वर्गदर्शनसर्गे कृतं वृक्षवर्णनम्

२. दशमसर्गे कृतं हिमालयवर्णनम्

३. आनन्देन कृता स्वर्गनिन्दा

**प्र. ५. यथानिर्देशं कुरुत।** **(०६)**

**अ) व्याकरणरूपाणि लिखत।**

विज्ञाय, प्राप्तवान्, भुक्त्वा, ध्यायिनः, राजर्षिभिः, मनसः

**आ) सन्धीन् विघटयत।**

व्याधिरल्पेन, नार्हाम्युपेक्षितुम्, प्रणयश्चैव, परिहासोऽयमीदृशः, भूतानामावृतिरिति, मृगीवैक

------------